# मुकुन्दमालायाम् कृष्णसङ्कल्पः

सुजा.के.वि

भक्तेः बहिः स्फुरणमेव मधुरमधुधाराभरितेषु स्तोत्रेषु उपलक्ष्यते। स्तवनम् एव स्तुतिः। मानवः अव्याख्येयानां प्रपञ्चरहस्यानां पुरतः अद्भुतपरतन्त्रः सन् तेषां नियमनं न साध्यम् इत्यवगच्छति। प्रपञ्चस्य आनुकूल्यं विना जीवनमसाध्यम् इति प्रत्यभिज्ञानेन प्रपञ्चशक्तीनामाराधनं कुर्वन्ति च।

नमस्कारस्तथाशीश्च सिद्धान्तोक्तिः पराक्रमः।
विभूतिः प्रार्थना चेति षड्विधं स्तोत्रलक्षणम्।।

भारतस्य महत्तरं बृहत्तरं च स्तोत्रपारम्पर्यं विद्यते। ऋग्वेदे अधिकभागः देवतानां स्तवनमेव। अस्माकं परितः विद्यमानानां प्रपञ्चशक्तीनां देवतारूपेण आराधनं वैदिकसम्प्रदाये सुलभम् ।। स्तुत्या प्रसन्नास्ते स्तोतारम् अनुगृह्णन्ति।

एवं स्तुतेः स्वाभाविकानन्तरगामी भवति प्रार्थना। भक्तिसाहित्ये स्तुतिः प्रार्थना च ऐकरूप्येण तिष्ठति।

श्रीशङ्करेण एवमुक्तम् - ' स्वस्वरूपानुसन्धानम् भक्तिः '। चित्तद्रवीभावमयो भावो भक्तिः।

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्।

अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्।। इति नवधा कीर्तिता भक्तिः श्रेयोऽर्थिभिरुपादेया।

ईश्वरसाक्षात्कारः एव मानवजीवनस्य लक्ष्यम्। तेनैव स्वस्वरूपं सम्यग् ज्ञातुं पुरुषः शक्तः भवति। तामवस्थां प्राप्तुं सर्वैरङ्गीकृतं सर्वादृतं च भवति भक्तिमार्गम्।। " आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ" ।[1] इति गीतावाक्येन भक्ताः चतुर्विधाः मां भजन्ते इति कृष्णेन स्फष्टीक्रियते। तेषु ज्ञानिनः भक्तिः

एव निष्कामा तथा उत्तमभक्तिः इत्युच्यते च। एतादृशायाः भक्तेः प्रणेतृषु अग्रगण्यः भवति श्रीकुलशेखरः। तस्य अखिलभारतप्रशस्तं कीर्तनकाव्यं भवति मुकुन्दमाला।

"यस्य प्रियौ श्रुतिधरौ कविलोकवीरा
मित्रे द्विजन्मवरपारवशावभूताम्।"
तेनाम्बुजाक्षचरणाम्बुजषट्पदेन
राज्ञा कृता कृतिरियं कुलशेखरेण।[2]

मुकुन्दमालाकर्तायं कुलशेखरः दक्षिणभारते वैष्णवभक्तपरम्परायां विद्यमानः कुलशेखर आल्वार् इति पण्डितानां मतम्।[3] किन्तु केरलीयः कुलशेखरराजा अस्माद् भिन्नः इत्यपि केचन अभिप्रयन्ति। अतिमनोहरमिदं स्तोत्रकाव्यं विष्णुभक्तः कश्चित् कुलशेखरः एव व्यरचयत् इत्यनुमाने न प्रमाद इति भाति। कुलशेखरमधिकृत्य मतभेदाः मुकुन्दमालायाः रचनाकालमधिकृत्यापि सन्दिग्धतां जनयन्ति। कुलशेखरः क्रिस्तोः पूर्वं ७६७ तः ८३४ पर्यन्तं जीवनमकरोत्। (केरलसाहित्यचरित्रं - उल्लूर्-प्रथमो भागः)

त्रयोदशशतकादारभ्य काव्यमिदं आभारतं प्रचरितं दृश्यते। वङ्गदेशीयः श्रीधरदासः १२०५ तमे वर्षे सङ्कलिते "सदुक्तिकर्णामृते" मुकुन्दमालायाः पञ्चश्लोकाः उद्धृताः दृश्यन्ते। त्रयोदशे शतके बर्मायां विद्यमाने एकस्मिन् शिलालिखिते अस्य काव्यस्य श्लोकमेकं लिखितं दृश्यते -

"नास्था धर्मे न वसुनिचये नैव कामोपभोगे
यद् भाव्यं तद् भवतु भगवन् ! पूर्वकर्मानुरूपम्।
एतत् प्रार्थ्यं मम बहुमतं जन्मजन्मान्तरेऽपि
त्वत् पादाम्भोरुहयुगगता निश्चला भक्तिरस्तु"

चतुर्दशे शतके विश्वनाथकविराजस्य साहित्यदर्पणे ईश्वरोन्मुखरतेः उदाहरणश्लोकत्वेन मुकुन्दमालायाः श्लोकमेकं स्वीकृतं दृश्यते।

"दिवि वा भुवि वा ममास्तु वासो
नरके वा नरकान्तक! प्रकामम्।
अवधीरितशारदारविन्दौ

चरणौ ते मरणेऽपि संश्रयामि" ।। एवं काव्यस्यास्य प्रशस्तिः व्याप्तिः अप्रमेयमहिमा च पुरातनकालादारभ्य समाजे अवर्तत।

मुकुन्दमालायां श्लोकसंख्यायाः विषयेऽपि मतभेदाः दृश्यन्ते। काश्मीरपाठे ३४,

केरलीयपाठे ३१ च श्लोकाः अधुना उपलभ्यन्ते। अस्य ज्ञातेषु षट् प्रसिद्धीकरणेषु श्लोकसंख्या भिन्ना-

१. मुंबई निर्णयसागर् प्रसिद्धीकरणं-४०

२. मद्रास् वाविल्ला प्रेस् -४०

३. श्रीरङ्गं वाणिविलासं प्रेस् -५४

४. मद्रास् श्रीरामकृष्णमठम् - ४१

५. तृश्शूर् रामकृष्णमठम् - ४४

६. कोट्टयम् एन्.बि.एस्.प्रेस् - ४७

एतेषां परिशोधनेन मुकुन्दमालायां सप्तति श्लोकाः प्रचरिताः दृश्यन्ते इति श्री.वि.शङ्कुण्णिक्कुट्टन् सहृदयसमक्षं प्रदर्शितवान् । आशयावर्तनं,शैल्यां सूक्ष्मभेदः, भक्तिभावे भावनाविलासे च ईषद्मात्रभेदः इत्यादीन् परिगणयामश्चेत् एतेषु सप्ततिश्लोकेषु बहुश्लोकाः प्रक्षिप्ताः भवेयुः इत्यतत् श्रद्धेयम्।

शैवं,वैष्णवं,शाक्तेयं,सौरं,गाणापत्यं,कौमारम् इति "षण्मतसङ्कल्पं" भक्तिप्रस्थाने अन्तर्भूतानि । एतेषु वैष्णवभक्तिप्रस्थानस्य बहु सविशेषताः सन्ति । अत्र श्रीकृष्णसङ्कल्पं प्रतिष्ठितं दृश्यते। सम्पूर्णभारतचरितस्य सूक्ष्मेक्षिकनिरीक्षणेन इदं स्मृतिपथमायाति यत् कृष्णसदृशो सर्वोत्कृष्टः परिपूर्णः सर्वगुणगणभूयिष्ठः ऊर्जस्वलः महापुरुषः न कश्चिदन्यो वर्तत इति । भारतीयसंस्कृतेः समस्तमण्डलेष्वपि कृष्णस्य प्रकटसान्निध्यं द्रष्टुं शक्नुमः। साहित्य-सङ्गीत-नाट्यादिषु, चित्रशिल्पकलासु , कथाकेलि-कूटियाट्ट-कृष्णनाट्टप्रभृतिषु केरलीय क्षेत्रानुष्ठानकलासु च कृष्णस्य अनन्यादृशस्वाधीनं दृश्यते। भक्तेः, तत्त्वचिन्तायाः, वर्णतालमेलसङ्गीतादि सुकुमारकलानां च मनोहरं सामञ्जस्यं कृष्णसङ्कल्पे अस्ति इत्यतः भारते विदेशे च आबालवृद्धं जनाः अस्मिन् मुग्धाः लीयन्ते । भारते लब्धप्रचारस्य मुकुन्दमालास्तोत्रकाव्यस्य

प्रमेयः श्रीकृष्णभक्तिः एव इत्यतः कृतिरियम् जनहृदयेषु कालातिवर्तितया इदानीमपि नरीनर्ति।

वैष्णवभक्तिप्रस्थाने वेदान्ततत्त्वानां समन्वयः प्रतिफलितः दृश्यते । वेदान्ततत्त्वानां भक्तेः च समन्वयः भागवतमहापुराणे स्फुटं दृश्यते। अतः एव वैष्णवस्तोत्रकाव्येषु वेदान्तचिन्तायाः भक्तेः समन्वय कृत्वा वर्णना साधारणा। अस्याः उत्तमोदाहरणं भवति मुकुन्दमाला।

"नास्था धर्मे न वसुनिचये नैव कामोपभोगे
यद् भाव्यं तद् भवतु भगवन् ! पूर्वकर्मानुरूपम्।
एतत् प्रार्थ्यं मम बहुमतं जन्मजन्मान्तरेपि
त्वत् पादाम्भोरुहयुगगता निश्चला भक्तिरस्तु" ।। इत्यस्मिन् श्लोके वेदान्तचिन्तायाः भक्तेः च समन्वयं स्फुटतर इत्यालोकयितुं शक्यम्।

जननमरणरूपसंसारसागरे निमग्नानां जनानां जीवनलक्ष्यम् संसारात् मोचनं भवति। मोक्षप्राप्तिः परमपुरुषार्थः इति एव आचार्याणां मतम्। तस्य प्रतिबन्धरूपेण देहाहङ्कारमनोबुद्ध्यादयः विद्यन्ते। कर्मयोगेन देहबोधं,ज्ञानयोगेन जीवने विद्यमानं अहङ्कारं,भक्तियोगेन मनः,योगानुष्ठानेन बुद्धिं च विशुद्धरूपतयापाद्य जीवात्मपरमात्मैक्यबोधेन संसारमुक्तिं प्राप्नुयादित्येव मनुष्यजीवनस्य परमलक्ष्यम्।

अत्र भक्तियोगे विषयमग्नं चित्तं सर्वेश्वरे दृढतरं कर्तुमुपदिशति-" जिते चित्ते जिते सर्वम्" इति। तदर्थं चित्ते ईश्वरं प्रतिष्ठातुम् उत्तमोपायं भवति स्तोत्रपारायणम्। मुकुन्दमाला उत्तममेकं स्तोत्रं भवति। श्रीकृष्णस्य महत्वं गुण-गणाः च वर्णयित्वा उत्तमभक्तः भगवन्तं कीदृशीं प्रार्थनां कुर्यादिति कविना सुव्यक्तं प्रतिपादितमत्र -

नाहं वन्दे तव चरणयोर्द्वन्द्वहेतोः
कुम्भीपाकं गुरुमपि हरे नारकं नापनेतुं।
रम्यारामामृदुतनुलतानन्दने नापि रन्तुम्
भावे भावे हृदयभवने भावयेयं भवन्तम्।।
विष्णुभक्तेः उज्ज्वलनिदर्शनं भवति मुकुन्दमाला।

भावार्द्रेण सङ्कीर्तनेन निराभरणसुन्दररचनासौकुमार्येण प्रसादात्मकेन मधुरतरं भवति काव्यमिदम्।

भक्तिभावः अत्र रसतामेति। भक्तिरसायनं नाम ग्रन्थे मधुसूदनसरस्वतिः-

वंशीविभूषितकरान्नवनीदराभात् पीताम्बरादरुणबिम्बफलाधरोष्ठात्।
पूर्णेन्दुसुन्दरमुखादरविन्दनेत्रात् कृष्णात् परं किमपि तत्त्वमहं न जाने।।

भक्तिमयभावनाविलासेन अलौकिकसाक्षात्कारेण च मानवेदस्य मनसि स्फुरितमिदं काव्यं भक्तिं रसत्त्वेन स्वीकरोति। काव्यस्यास्य अङ्गी रसः भक्तिः एव।

" विमोहनानामपि वा विमोहनम् प्रमोदनानामपि वा प्रमोदनम्।
किशोरलीलायितमीश! ते विभो विशेषरम्यं विवशीकरोति माम्"।। इत्यत्र मानवेदस्य मनसि स्फुरितमलौकिकसाक्षात्कारं सहृदयानामपि भगवद्साक्षात्काराय भवति।

यत् प्रसादलवलाभतः परां सिद्धिमेति मलिनोऽपि मानसः।
यत् प्रसादविधुरोऽपि बध्यते बुद्धिमाञ्छरणमेमि तं हरिम्।।
इति मङ्गलश्लोकेन हरिं भजति।

श्रीशङ्करस्य अद्वैतसिद्धान्ते आकृष्टः चेदपि स्वाभाविक्याः भक्तेः स्फुरणस्य स्पृहणीयतां आस्वाद्यतां च अनुभवयोग्यां कर्तुमेव राघवानन्दः तात्पर्यदीपिकामरचयत्। सैद्धान्तिकपरं अद्वैतज्ञानं तथा स्वाभाविकीं भक्तिप्रवणतां च चित्ते सुरञ्जितां समञ्जसां च कर्तुं अनया शक्यते। भक्तेः अन्यादृशं वैशिष्ट्यं प्रदर्शयति व्याख्याकारः ....." इह जन्मन्युक्त धर्मादि साधनविकलानामपि भक्तिवतां तन्माहात्म्यादेव पुमर्थावाप्ति श्रवणाच्चानौपाधिकी भक्तिरेव मुक्तिसाधिकेति सैवाभ्यर्थनीया मुमुक्षुभिरित्यतस्तदुपायत्वेन श्रीनारदानुगृहीतमौकुन्दाष्टादशाक्षरं मन्त्रं मुकुन्दचरणशब्दाभ्यां प्रत्यभिज्ञापनया अत्र प्रमाणयन् मुकुन्दमालाख्यं स्तोत्ररत्नमकरोत् इति।

कविः मुकुन्दमालायां सगुणं साकारं च देवं कीर्तयति। " जीवो ब्रह्मैव नापरः" इति अद्वैतं, " ब्रह्म सत्यं जगन्मिथ्या " इति निर्गुणनिराकारब्रह्माद्वैतं

च कथं अत्र युज्यते इति संशयःस्य समाधानेन

व्याख्यानमिदमारभ्यते- " एवं च परमार्थतः सच्चिदात्मकं विश्वोत्पत्तिस्थितिसंहारकारणं ब्रह्मैवात्मा,न तत् कार्यं तदंशो वा 'अयमात्मा ब्रह्म', ‘क्षेत्रज्ञं चापि मां विद्धि' इत्यादि श्रुतिस्मृतिवाक्यात् जीवाः परमात्मनस्तत्त्वतो न भिद्यन्ते, आत्मत्वात् परमात्मवत् ,विपर्यये अन्यतरस्यानात्मत्वप्रसङ्ग इत्यनुमानाच्च। तथाप्यनुभूयमानत्वादात्मवदपलापना ईमद्वितीये द्वैतस्यासम्भावितत्वात्, "मायामात्रमिदं द्वैतम् अद्वैतं परमार्थतः" इति श्रवणाच्च महेन्द्रजालवन्माया मात्रसिद्धं स्तोतुस्तुतिस्तुत्यभेदमादाय स्तोतुमुपक्रमते " मुकुन्देति"। यथाह साम्बः "स्तोता स्तुत्यं स्तुतिरिति भवान् कर्तृकर्मक्रियात्मा क्रीडत्येकः" इति । त्वां स्तोष्यामि स्तुतिभिरिति मे यस्तु भेदग्रहोऽयं सैवाविद्येति च।

मुकुन्दमालायाः "तात्पर्यदीपिका" नाम व्याख्यानं केरलीयेन राघवानन्देन कृतं दृश्यते। क्रिस्तुवर्षं सप्तदशशतके तात्पर्यदीपिकां अरचयत् व्याख्याता। तात्पर्यदीपिकायां समाप्तौ एवं दृश्यते-

सच्चित् सुखैकरसमन्वहमात्मतत्त्वं
साक्षात् समुन्मिषति यस्य हृदीह दैवात्।
आनन्दशेखरितराघवनामधेयः
सोऽयं मुनिर्विमृशति स्म मुकुन्दमालाम्।।
कृष्णानन्दगुरोरेषा पूर्णकारुण्यसर्पिषा
रचिता हरितोषाय जीयात् तात्पर्यदीपिका इति।।७

व्याख्यानारम्भे -

अर्थवत्तया आत्मतत्त्वं प्रकाशयितुं आनन्दानुभवमिदं व्याख्यातुम् एव अद्वैतसिद्धान्ती राघवानन्दः भक्तस्य कुलशेखरस्य रचनावैशिष्ट्यान्तर्निहितस्य भक्तिकाव्यस्य मुकुन्दमालायाः व्याख्यानमरचयत्। श्लोकानां व्युत्पत्त्यर्थविवरणेन व्याख्याता काव्यस्य आस्वादनं सुकरं करोति। उचितं उपक्रमं,श्लोकानाम् आशयानां पूर्वापरबन्धनिर्देशेन
अर्थनिरूपणं,प्रमाणरूपेण श्रुतिस्मृतिपुराणादिषु विद्यमानानि उद्धरणानि च कृत्वा शास्त्रीयरीत्या व्याख्यानमिदम्

आरचितम्। भागवतोत्तमस्य कुलशेखरस्य ललितरचनारुचिरं भावगानमधुरं च मुकुन्दमालास्तवं
राघवानन्दस्य शास्त्रोक्तिदीप्तेन अर्थविचारपुष्कलेन च तात्पर्यदीपिकाव्याख्यानेन संस्कृतसाहित्ये अद्वितीयं स्थानमलङ्करोति।।

**ग्रन्थसूचीः-**

१. भगवद्गीता

२. मुकुन्दमाला-४४ अन्तिमश्लोकः।

३. आषवारकल कालनिलै-१६१.पुटम्-केरलसंस्कृतसाहित्यचरित्रं

४. केरलसाहित्यचरित्रं-प्रथमो भागः

५. मुकुन्दमाला-४

६. मुकुन्दमाला-६

७.तात्पर्यदीपिका-राघवानन्दः

**सहायक ग्रन्थाः**

१. केरलीयसंस्कृतसाहित्यचरित्रम्-वडक्कुंकूर्।

२. मुकुन्दमाला - गुरुवायूर् देवस्थानम्।

३. मुकुन्दमाला - श्रीरामकृष्णाश्रम्,तृश्शिवपेरूर्।

४. आर्षज्ञानम् - नालप्पाट्ट् नारायणमेनोन्।

************************************************************